यः कुर्यान्ब्राह्मणानाहूय विशिष्टब्राह्मणानुज्ञां लब्ध्वा ततः सहपत्नीकः शुभस्थले
प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्याग्नीनाधास्यमानः
कर्मसाफल्यार्थं बौधायनोक्तप्रकारेण पुण्याहवाचनपूर्वकं अंकुरार्पणं करि
ष्ये। तदादौ गणपतिपूजनं करिष्ये। इति संकल्पं कुर्यात्। सूत्रस्य स्पष्टत्वात्प्रयो
गो नोक्तः। रात्रावुदकशान्तिं प्रतिसरबंधं च कुर्यात्। अग्न्याधानकेऽहनि प्रातः कृ

त निसक्रियः अग्न्याधानागारं गोमयेनोपलेपयित्वा तोरणादिनालंकृत्य शिष्टा
न्ब्राह्मणान् निजआश्रमं अदृष्टदेवादीन्द्रष्टुं अशिष्टांश्च संपूज्य प्रणिपत्य सपत्नि
कः शुचिर्भूत्वा पूर्वेणोपासनाग्निं दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राण
नायम्य देशकालौ स्मृत्वाऽग्नीनाधास्यमानस्तदंगत्वेन गणपतिपूजनं पुण्याहवा
चनं मातृकापूजनं नांदीश्राद्धं च करिष्ये। इति संकल्प्य कुर्यात्॥ अथ प्रधान सं
कल्पः॥ पूर्ववद्दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ
संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं सर्वकामार्थं होमपूर्वान् सोमपूर्वान् इष्टिपूर्वान्वा
॥ अग्नीनाधास्ये यानि शक्ष्यामि यैश्चास्म्यधिकृत इति संकल्प्य॥ त्रिरूपां श्रुति
रूढ्वैरिति शिष्टाचारात्॥ बौधायनीये स्पष्टोक्तेश्च यथोक्तः स तोनस्तत्र युक्तः पौर्ण
मास्यामाधानं केवलपौर्णमास्यां वा ततः इष्टिपूर्वाधानं॥ अमावास्याधानं पूर्वेद्यु

३८ क्षेत्रभद्रिनेनक्षत्रेवाधानंतत्सोमपूर्वाधानं।उक्तकालेदीक्षितस्यसुत्यानविहन्यते
तथासोमयागार्थंतत्पूर्वमेवाधानं।ऋतुनक्षत्रविरोधेनापिकर्तव्यंतत्सोमपूर्वाधानं।
उदवसानंवैकल्पिकं।उदवसायोपासनेकूश्मांडहोमोनवा।कर्मा।एषेतैर्जुहुयादिति
श्रुतेः।पूर्णाहुत्यनंतरंवा।तदाहवनीयस्योत्पत्तेः।बौधायनीयेस्पष्टकाठकेश्च।सोऽपि
सर्वकर्मादिकालः।कर्मादिकूश्मांडहोमेत्विष्योऽप्यावर्तिनामाश्वनभवति।अथऋत्वि
ग्वरणं।अस्मिन्नग्न्याधेयेअमुकगोत्रोऽसन्नमुकशाखाध्यायिनंयज[illegible]म।ऽ
मध्वर्युंवांवृणे।अध्वर्योहस्तंगृहीत्वाब्रूयात्।ऋत्विग्भ्यस्तेफलहिरण्यादिदानमिति
शिष्टाचारः।एवंब्रह्महोत्राग्नीध्रवरणं।सदस्यवरणंच।वृतानांमधुपर्कपूजनंनेति ३८
केचित्।आधानस्यायज्ञत्वात्।अथमधुपर्कः॥ ॥यजमानशाखयाआर्त्वि

ज्यशास्त्वयावा। तत्र सर्वेषामृत्विजां काउानुसमयेन , र्थानुसमयेन वा आर्त्वि
ज्यशास्त्वायद्यातदा ऋकृशारवीयहौत्रपक्षे होतुः पृथगेव। तत्र यजमानः।
प्रत्य. त्विजं कूर्चं पाद्यमर्घ्यमाचमनीयं मधुपर्कं इति पं द्रव्याणि पृथक्पृथक्
पात्रेषूपकल्पयति मधुपर्के त्रिवृतं पांक्तं वा। कांस्यपात्रे दध्यानीय मध्वा
नयति अंते घृतमिति त्रिवृत्। दधिमधुआपः सक्तवो घृतमिति पांक्तः।ऋ ॥
पा। स्यानीयवर्षीयसापिधायेति प्रति द्रव्यं पात्रद्वयं। ततो यजमानः ऋत्विजः
प्रति अर्घ्यं इति त्रिः प्राह। कुरुतेत्यृत्विजः। यज० दर्भासनं कूर्चं इति त्रिः कूर्चं
कल्पयति। ऋत्विकूराष्ट्रभृदः स्याचार्यासं दीमात्वद्योषां। तस्मिन्प्राङ्मुखं उ
पविशति। यजमानः। पाद्यार्थमुदकं पाद्यामिति त्रिः कल्पयति तेनास्य द

क्षिणपूर्वकं पादौ प्रक्षालयेत्। ऋत्विक्। विराजो दोहो सि मयि दोहः पद्यायै
२१ विराजः। प्रक्षालयितुर्हस्तावभिमृश्य। मयि तेज इंद्रियं वीर्यमायुः कीर्तिर्व
र्चो यशो बलं। आत्मानं प्रत्यभिमृशति। यजमानः। अर्घ्यमिति त्रिः। ऋत्वि
क्। आमागन्यशसा संसृज तेजसा वर्चसा पयसा च। तं मा कुरु प्रियं प्रजा
नामधिपतिं पशूनां। ऋत्विग्गृह्णाति। यजमानः। शेषं निनयति। ऋत्वि
समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपि गच्छत। अच्छिद्रः प्रजया भूयासं
मा परासेचि मत्पयः। शेषं निनीयमानमनुमंत्रयते। अर्घ्येण साकं वस्त्रा
रणादि दानं। यजमानः। आचमनीयमिति त्रिः। ऋ। त्विक्। अर्धं जलं हस्ते गृ २९
हीत्वार्धं उत्तराचमनीयार्थं स्थापयति। अमृतोप[illegible]स्तरणमसि। हस्तस्थं

प्राश्नाति। यजमानः। मधुपर्कं इति त्रिः प्राह। ऋत्विक्। देवस्य त्वा०भ्यां प्रतिगृह्णाति गृ
ह्णा॰मि। मधुपर्कं प्रतिगृह्य। पृथ्व्या स्त्वा नाभौ सादयामि। इडायाः पदे। पृथिव्यां प्र
तिष्ठाप्य। यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण
रूपेण परमो मधव्योऽन्नादो भूयासं। अनुष्ठेनोपमध्यमया चांगुल्या त्रिः प्रदक्षि
णमालोड्य स कृन्मंत्रेण द्विस्तूष्णीं। तेजसे त्वा श्रियै यशसे बलायान्नाद्याय .। यः
श्नामि। त्रिः प्राश्य सकृन्मंत्रेण द्विः स्तूष्णीं सर्वं। अमृतापिधानमसि। स्वाषि
ता अप आचामति। ततः शुद्ध्यर्थमाचमनं। यजमानः। गौरिति त्रिः प्राह। ऋत्वि
क्। गौर्धेनुर्भव्या माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।
प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। पिबतूदकं तृणान्यत्तु।
लि

हि॰आ॰ ओंउत्सृजत। उत्सर्गे सङ्ख्यास्ति। यजमानस्तामुत्सृजति। अत्रैतावत्सैव मधुपर्क
४० पूजा कर्तव्या। भोजनान्तेति केचित्। भोजनस्याङ्गत्वात्। यजमानः अंनं
सं॰स्कृत्य। भूतमिति त्रिः प्राह। ऋत्विक्। तत्सुभूतं विराडन्नं तन्माक्षायि तन्मेशी
यतन्मऊर्जं धास्तत्सुभूतमित्युक्त्वा। अथ ब्राह्मणान्भोजनेत्याह। य॰ ब्राह्मणा
न्भोजयति। तेषु भुक्तवत्सु अस्मै अन्नमाहारयति। ऋत्विक्। द्यौस्त्वेददातु पृथि
वी प्रतिगृह्णातु पृथिवी त्वे ददातु प्राणः प्रतिगृह्णातु प्राणस्त्वाश्नातु प्राणः पि
बतु। तदन्नं प्रतिगृह्णाति। इंद्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः। वर्चो मे विश्वे
दे॰ावर्चो मे धत्तमश्विना। तस्माद्यावदर्पैत मंत्रं प्राश्नाति। ततः शुध्यर्थमाचमनं।
एवं सर्वेषां वर्णक्रमेण मधुपर्कः॥ ॥अथ ऋक्शाखीयो मधुपर्कः। यज॰।

क्षि

पाद्यार्थमर्घ्यार्थमंत्रवत्त्रिराचमनार्थंशुद्धाप्लावमर्थेनोः जलपात्रचतुष्टयंमधुपर्क
युक्तकांस्यपात्रंपंचविंशतिदर्भैर्वामावर्तविष्टरारव्यमासनं। एतान्पदार्थानुपक
ल्प्य। होतारममुकशर्माणंमधुपर्केणार्हयिष्ये। इति संकल्प्य। दिष्टरंहस्तेगृही
त्वाविष्टरइतित्रिरुक्त्वा। ऋत्विक्हस्तेदद्यात्। ऋत्विक्। अहंवर्ष्मसजातानांवि
द्युतामिवसूर्यइदंतमधितिष्ठामियुतेमाकश्चाभिदासति। उदगग्रेविष्टरेउपवि
शति। यज०। पाद्यमितित्रिरुक्त्वापाद्यार्थमुदकंदद्यात्। तेनोदकेनतस्यपादौपा
प्रक्षालयेत्। ऋत्विक्। लौकिकेनजलेनाचामति। यज०। गंधमाल्यफलादियुक्तं
अर्घ्यजलंअर्घ्यमितित्रिरुक्त्वादद्यात्। ऋत्विक्तत्प्रतिगृह्णाति। यजमानः॥
आचमनीयामितित्रिः। ऋत्विक्। तत्प्रतिगृह्यतदेकदेशंहस्तेनपिबति। अ

आ० मृतोपस्तरणमसि। ततो लौकिकाचमनं। आनीयमानं मधुपर्कमीक्षते। मित्र
१ स्यत्वा चक्षुषा प्रतीक्षे। यज०। मधुपर्कं दाति त्रिर्मधुपर्कं निवेदयेत्। अञ्जलिकृतं
मधुपर्कं अंजलिना प्रतिगृह्णाति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पू
ष्णो हस्ताभ्यां प्रतिगृह्णामि। मधुवाता इति। तृचस्य राहूगणो गोतमो विश्वेदेवा गा
यत्रं। मधुपर्कावेक्षणे विनियोगः। मधुवाता ऋतापते० षसो मधुमत्पार्थिवं रजः।
मधुद्यौ० भवतु नः। अवेक्ष्य। अंगुष्ठानामिकाभ्यां त्रिः प्रदक्षिणमालोड्य अंगु
लीगतं लेपं प्रतिदिशं निमार्ष्टि। वसवस्त्वा गायत्रेण छंदसा भक्षयंतु। पु
रस्तात्। रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंतु। दक्षिणतः। आदित्यास्त्वा जागते ८१
न छंदसा भक्षयंतु। पश्चात्। विश्वेत्वा देवा आनुष्टुभेन छंद, :भक्षयंतु उत्तरतः॥ भूते

भ्यस्त्वा। त्रिर्मधुमुत्क्राम्यध्यानुत्रिरूर्ध्वमुत्क्षिप्यति किंचित्। ततः पात्रं भूमौ निधाय
मधुपर्कैकदेशं हस्तेन गृहीत्वा। विराजो दोहोसि। प्राश्य शुध्यर्थमाचम्य।। पुनः मधु
पर्कैकदेशं गृहीत्वा। विराजो दोहमशीय। प्राश्याचम्य। पुनर्गृहीत्वा। मयि दोहः पद्या
यै विराजः। प्राश्याचम्य। मधुपर्कशेषं ब्राह्मणाय प्रयच्छेत् जले वा। स्थापिताचमनी
योदकं हस्तेन गृहीत्वा। अमृतापिधानमसि। ॐ आचामति। पुनर्लौकिकाचमनं।
पुनः स्थापिताचमनीयोदकं सर्वं गृहीत्वा। सत्यं यशः श्रीर्मयि श्रयतां। प्राश्य लौ
किकं द्विराचमनं कुर्यात्। यज० गौरिति त्रिर्गां निवेदयति। स जिहुः। माता रुद्रा
णां इत्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्। गोरुत्सर्जने विनियोगः। माता रु
द्राणां दुहिता वसूनां स्वसादित्यानाम् अमृतस्य नाभिः। प्रनुवोचं चिकितुषे
जनाय मा गामनागामदितिं वधिष्ट। ॐ मुत्सृजतेत्युत्सृज्य।। विसृजेत्। यज्ञ
वस्त्राभरणादिभिः [illegible] ॥ इति मधुपर्कः ॥ ॥ प्रयोगः। अथ [illegible] ॥

आ
४२

८

पश्चाद्दिशस्थमादाय पूर्वोपभृते अरणीकृत्वोत्तरेन स तक्ष्णादिना संस्कृत्य पु
च पश्चाच्छया यो अश्वत्थः शमीगर्भ आरूरोह त्वे सचा । तं ते हरामि ब्रह्मणा यज्ञियैः
केतुभिः सह । इत्यधरारणिमाहरति । पुनर्मंत्रमुच्चार्योत्तरारणिं । अश्वत्थाद्
हव्यवाहाद्दिजातामग्नेस्तनूं यज्ञियां संभरामि । शांतयोनिः शमीगर्भ
मग्नये प्रजननायितवे । औपासनसमीपे अधरारणिं संभरति । पुनर्मं
त्रमुच्चार्योत्तरैवोत्तरारणिं । आयुर्मयि धत्तामायुर्यजमाने ॥ युगपदुभे अभि
मंत्रयते ॥ एतदाचाराविरुद्धं पत्न्यपि करोति मानुषेणालंकारेणालंकृतौ
भवतः ॥ दंपत्यो र्भोजनं हविष्यस्य सूत्रांतरात् भवति ॥ अधिवृक्षसूर्ये ॥ ४८
गार्हपत्यायतनस्य पश्चात्स्थंडिलं तूष्णीमुद्धृत्योल्लिख्यावोक्ष्याभ्युक्ष्य
औपासनादेकदेशं प्राचांतरे उद्धृत्य गार्हपत्यस्य पश्चादुपकल्प्य तस्मिन्
४ य. केशश्मश्रूणि वापयते नखानि निकृंतते दंतान् धावते स्नात्वाहतं वासः परिधत्ते

उ द्धे निदधाति॥ स ब्रह्मौदनिकोऽग्निः॥ सर्वं वौपासनं ब्रह्मौदनिकार्थमुद्धरतीत्य· प
रस्तं बृः॥ निशायामष्टमे मुहूर्ते तमग्निमुपसमिध्य परिस्तीर्य दक्षिणतो ब्रह्मयज
मानयोः सदने कृत्वोत्तरेणाऽग्निं दर्भान्संस्तीर्य तेषु पात्राणि साहयति॥ दर्वी शूर्पा
णाशीः समिधः सपलाशामाज्यस्थालीमग्निहोत्रहवणीं चरुस्थालीं मेक्षणं शूर्पं कृ
ष्णाजिनमुलूखलं मुसलं लोहितमानडुहं चर्मपाजकं वाति स्त्रिवृत्ति चाश्वत्थीः समिध
स्तिस्रः भिः कवतीरस्तिस्रः भिः का वा प्रादेशमात्रीः॥ चतुर्मुद्धरण पात्राणि निर्वपः॥ श
रावमुपवेषं च॥ ब्रह्मयजमानावपरेणाग्निं दक्षिणातिक्रम्य स्वस्वसदनात्तृणं निरस्या
प उपस्पृश्योपविशतः॥ पत्नी पत्न्यालोके॥ अध्वर्युः॥ पवित्रे कृत्वाऽनडुहे लोहिते च
र्मणि पाजके वांतर्धाय शरावेण निर्वपति॥ शरावं व्रीहिभिः पूरयित्वा॰ देवस्य त्वा॰

हि॰ श्रा॰
४२

भ्यां ब्रह्मणे प्राणाय जुष्टं निर्वपामि। देवस्य॰ भ्यां ब्रह्मणे पानाय जुष्टं निर्वपामि।
देवस्य॰ भ्यां ब्रह्मणे व्यानाय जुष्टं निर्वपामि। देवस्य॰ भ्यां ब्रह्मणे जुष्टं
निर्वपामि। अग्निहोत्रहवण्यां तूष्णीं प्रोक्षणीः संस्कृत्य तूष्णीं हविः
प्रोक्षति। उक्तानि पात्राणि प्रोक्ष्य। कृष्णाजिनास्तरणाद्दृषदी ऽन्त
र॰ । तं सर्वं तूष्णीं करोति। न प्रक्षालयति। नावसिंचति पयसि श्रपयति।
अथवा चत्वार्युदपात्राणि स्थाल्यामानीय तस्मिन्नुदके श्रपयनीत्येके। द
र्वीं संमृज्याज्यं संस्कृत्य शृतं चरुमभिघार्योदगुद्वास्याग्नेः पश्चाद्द
र्भेषु सादयित्वाग्निं सर्वतः प्रदक्षिणं परिषिच्यासादितां पालाशीं स
मिधमाधाय चरुं दर्व्योपहत्य जुहोति। प्रवेधसे कवये मेध्याय वचो वंदा
रु वृषभाय वृष्णे। यतो भयमभयं तन्नो अस्त्वव देवान्यजे हेड्यांस्वाहा। प ना ४२

मा॰ ब्रह्मण इदं॰ अपि वाध्वर्युरभिमंत्रयेत्॥ तदानस्त्वा हाकारः। न परिषेको प-
रिषिच्य परिस्तरणानि विसृज्य। यज॰ सर्वं चरुं चतुर्षु पात्रेषु व्युद्धृत्य प्रभृते म-
सर्पिषोपसिच्य यः स्थाल्यां शेषस्तस्मिन्सर्पिः शेषमानयति। चतुर्थोव्युद्-
तं चरुं चतुर्भ्य आर्षेयेभ्य ऋत्विग्भ्यो ददाति। होत्रध्वर्यु ब्रह्माग्नीध्रेभ्यः देपुरो-
त ·· मकवलेषु ऋत्विजः वरं ओदनं दामि। इति वरं श्रावयेत्। ऋत्विजः प्राश्या-
·· र प्रतिगृह्णंति। अध्वर्युः। त्रिवृदयाभ्यस्थ समिधः स्थालीगतशेषेभ्यज्या
भिमंत्रयते। त्रिवृयादश्वस्थात्सं भृता हृहत्यः शरीरमभिसंस्कृतास्थ॥ प्रजा-
पतिनायज्ञमुखेन संमितास्तिस्त्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै। समिधोभिमं-
त्र्य ब्रह्मौदनिक आदधाति। समिधान्निइध्मस्यतद्धैवेर्भ्य … यतातिथिं॥ आस्मि-

हि॰आ॰
४४

हव्या जुहोतनस्वाहा। अग्नयइदं। उप त्वाग्नेहविष्मतीर्घृताचीर्यंतु हर्यत। जुषस्वस
मिधोमम स्वाहा। अग्नयइदं। तं त्वा समिद्भिरंगिरो घृतेनवर्धयामसि। बृहच्छोचा यवि
ष्ठ्यस्वाहा। अग्नयइदं। श्रुतिगायत्रीभिर्ब्राह्मणस्य। यजं। मिथुना वा सिक्तं रेतसा वृध्यते
ते ॰मि। धारयति ब्राह्मौदनिकं। श्व आधास्यमानोध्वर्युर॰ ॰ रात्रिंव्रतं चरति।
न॰ ॰वदति। नमांसमश्नाति। न स्त्रियमुपैति। इदं अतं ॰ ॰मान स्यापि। प्रजा अ
ग्नेसंवासयाशाश्च पशुभिः सह। राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुःसवे। उत्त
रेण गार्हपत्यं कल्माषमजं बध्नाति। कृष्णबिंदुयुक्तइत्यर्थः। शिल्पैर्वीणादिभि
रितिहासपुराणैर्वा यजमानं जागरयंति। यजमानपत्न्यृत्विजो जागृति। अशक्ता ४४
विषुयः कश्चन। यजं शल्कैरग्निमिंधानउभौलोकौसनेमहं। उभयोर्लोकयोर्

ध्यातिमस्तुंतराम्यहं।यज्ञवृक्षशल्कैरग्निमिंधानोजागर्ति।प्रतिल्कमंत्रावृत्तिः।अ
ध्वर्युः।पूर्वोणरूक्षान्संभारानाहृत्यासंभरेतत्तन्मंत्रेणप्रागपवर्गंसंभरति।वैश्वानरस्य
रूपंमाविशंतुनः।सिकताःसंभरति।यदिदंदिवोयदद्ःपृथिव्याःसंजज्ञानेरोणामिश्राः।
उद्भान्।ऊतीःकुर्वाणोयंशरदःसवीराः।आखूत्करं।ऊर्जंपृथिव्यारसमाभरंतः।शतंजी
वेमशरदःपुरूचीः।वम्रीभवामः।वल्मी।कूपं।प्रजापतिसृष्टानांप्रं०रसमाभरामि।
सूदं।यस्यरूपंबि०मस्यांविधेन।वराहविहतं।यसर्यपश्यत्सरिरस्यं०थनःहरामि।
उकरपर्णं।याभिरदंहज्जगतः०शर्कराःसंतुसर्वाः।शर्कराः।अग्नेरेतश्चंद्रं०नरेयं।
हिरण्यशल्कैःसहरजतशकलानि।अश्वोरूपंकृत्वायदश्वं०दःसवीराः।आश्व[illegible]
ऊर्जंपृथिव्याअध्युं०मिषामदेमा।औदुंबरं।गायत्रियाह्रियं०स्यावरुध्यै।देवानां।

१० रुंधीयसाक्षात्।पर्णमयं।यपातेसृष्टस्य॰शमीऽशांसैहराम्यंहं।शमीमयं।यत्रे स
५ स्ययतः॰मनुप्रभः हि।वैकंकृतं।यत्रेतांतस्यहृदं॰हृदयोभेवहा।अशनिहतः
रं त्वासमभरंजातवेदो॰मनुनेषिविद्वान्।एकपात्रेसर्वान्स्थकृत्स्नंमृतान्स्सं मा
शान्सहविहारदेशेनिदधाति।ततउषःकालात्प्राक्तनकालेकृतस्नाना
भवंति।अध्वर्युः।आह्नोदनिकमाग्निंपरिस्तीर्यदक्षिणतःसदनेकृशोत्तरै
णाग्निंदर्भेषुपात्राणिसादयति।जुहूंस्रुवमग्निहोत्रहवणीमाज्यस्थाली
महतींपलाशशाखामभ्रिमुपयमनीःसिकताःसर्वौषधीःहिरण्यंरथंरथ ४५
चक्रंवानवाश्वत्थीःप्रादेशमात्रीःसमिधःद्वादशशमीमयीस्तिस्रःऔदु
बरीस्तिस्रोवैकंकतीःउपवेषंक्षौमेवाससीअरणीचप्रयुनक्ति।ओलयस

मानो तीर्थेन। ग्रेण विहारदेशाद्गत्वा दक्षिणत उपविशतः। पत्नीपस्या लोके।
अध्वर्युः। तूष्णीं पवित्रे कृत्वा। प्रोक्षणीः संस्कृत्य उत्तानानि पात्राणि प्रोक्ष्य
स्रुवं स्रुचौ च संमृज्याज्यं संस्कृत्य। श्रोह्रोदनिकेग्नो हस्ताभ्यामरणी सहाग्नि
ष्टपत्नि। जातवेदो नुवेनस्य रेत इह सिंच तपसो यज्जनि० ष्यन्यो मयोभूः। अयं
ते योनि० था नो वर्धया रयिं। उपर्यग्नावरणी धारयमाणो मंत्रौ पठति॥ दोह्याच तेडुग्धम्
द्यावर्वरी तते भागधेयं प्रयच्छामि ताभ्यां त्वादधे। अरणी यजमानाय सह प्रयच्छति। य
ज० मही विश्पत्नी सद० यथः पुरोगा। अरणी प्रदीयमाने प्रतीक्षते। आरोह तद्दर
तं शक्वरी० यज्ञं यथा यजे। अरणी सह प्रतिगृह्णाति॥ ऋत्वियवती स्थो अग्निरेत०
रं जनयिष्यथः। तेम स्त्रातः प्रजनिष्येथे। स्वेन सुवर्गे लोके॥ द्वाभ्यां प्रतिगृहीते ॐ णी

हि॰आ॰ अभिमंत्रयते। अध्वर्युः॥ मयिगृह्णाम्यग्रे॰सुवीराः॥ योनोअग्निःपितरो॰परागात॰। हृ
४६ र्य्यामात्मन्नपिंगृह्णाते॥ यजमानोपिमंत्रौजपति॥ यज॰ इदमहमनृतात्सत्यमुपैमि॰। स्मै
मानुषमुपैमि। मानुषाद्दैव्यमुपैमि दैवींवाचंयच्छामि। वाचंयच्छाति। अध्वर्युः॥ अग्नीरे
क्षांसिसेधतिशुक्रशोचिरमर्त्यः॥ शुचिःपावकईड्यः॥ अग्निमभिमंत्रयते॥ अनुगमन
यतिब्रह्मौदनिकमग्निंअस्मिन्नूकालेशुल्बोक्त प्रकारेणायतनानांकरणं। प्राचीनं
ब्रह्मौदनिकाद्गार्हपत्यस्य॥ प्राचीनंगार्हपत्यदृष्टादेशप्रक्रमेष्वाहवनीयस्य॥ आ
दक्षिणतोविहृतीयदेशेनेदीयसिगार्हपत्यस्यदक्षिणाग्नेः॥ आहवनीयात्प्राची
नमरत्निमात्रेसभ्यस्य॥ सभ्यात्प्राचीनमरत्निमात्रेआवसथ्यस्येति। अग्नित्रयपक्षेत्री स्व
ण्येवायतनानि॥ इतऊर्ध्वमुद्धननक्रमएव। सूत्रेअनुक्रमपिक्रमप्रकरणाभ्योविनियु ४६

६

क्तेनोद्धूनानासंगपेतवीतिपलाशशारवयायतनसंमार्जनंकर्त्तव्यमितियाज्ञिक
संप्रदायः। अपेतवीतविपितरोलोकमस्मै। पलाशशारवयागार्हपत्यायतनंसं
मार्ष्टि। एवंदक्षिणाग्नेराहवनीयस्यच॥ शारवाग्निरस्यापउपस्पृश्य। अग्निमाद
धाउद्धूयमानमस्याग्नेमध्यं॰ गार्हपत्यायतनमुद्धूसापउपस्पृश्य। एवंदक्षिणा
ग्नेः। एवमाहवनीयस्य। सभ्यावसथ्ययोरपिपक्षेतयोरपि॥ अयमेवाग्नेः सर्व
त्रक्रमः॥ शन्नोदेवी॰ स्वयंतुनः। शुद्धाभिरद्भिर्गार्हपत्यायतनमवोक्षति। एवं
मितरयोः॥ अथवाअवदानप्रदानन्यायेनोद्धूनावोक्षणे इतिकेचित्॥ तत्स्वत्वा
स्वारस्यं। आयतनानिपरिस्तीर्यस्वरहोमांजुहोति। आयतनेषुहिरण्यंनिधा
यजुहोतीतिवैखानसः॥ स्रुवेणजुहोतिविराज्यंगृह्य। त्वाविश्वाहंजुहोतिगार्हपत्ये।
रुद्रपंतमसस्य॰ रुद्रमः स्वाहा। सूर्यायेदं॰ चतुस्यं॰ सूर्यः स्वाहा। सूर्यायेदं॰ वि

हि॰आ॰ ४७

चंदेवानां तस्तुषभ्य स्वाहा। सूर्यायेदं। अग्निर्गृहीतेव। मितरायेनेषु। नवा
रूवरहोमाः। उपक्लृप्ताः संभरा एकैकं द्वैधं विभज्यार्धं द्वैधं कृत्वा। गार्हपत्य
दक्षिणाग्न्यायतनयोर्निवपति। अवशिष्टार्धं त्रेधा विभज्याहवनीयसभ्या
वसथ्येषु निवपति। तयोरभावेऽवशिष्टार्धमाहवनीय एव। अग्नेर्भस्मास्य
ग्नेः पुरीषमसि। सिकताभागं गार्हपत्यायतने निवपति। एवमितरयोः। सभ्या
वसथ्याभावे तयोराहवनीय एव संकल्पो मंत्रावृत्त्या संभारनिवपने मि
तिबोधायनः। मंत्रावृत्तिर्न कर्तव्येति सुवचं॰। एकस्ये वा अग्नेस्तत्र स्थाप ४
यितात्। संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्। गार्हपत्या

यतने सिकता समोप्य अस्थिष्ठान्। प्रज्ञातान् तुषान् निवपति। यददश्चंद्र
मसि कृष्णं तदिहास्त्विति तुषान्निवपन्नदो मनसा ध्यायति। एवमितरयोः।
उद्धृत्याग्ने अधिपातुः पृथिव्या विश आविशा महतः सधस्थात्। आश्रुत्कर्ण।
यो दधिरे देवयं नो हव्यवाहं भुवनस्य गोपां। आस्वूकरई गोपत्ये एवामि
तरयोः। यत्पृथिव्या अनाम्रतं संबभूव लेसचा। तदग्निरग्नये ददा
त्तस्मिन्नाधीयतामयं। गार्हपत्यायतने वल्मीकवपां निवपति। यदंतरि
क्षस्यानाम्रतं संबभूव चेसचा। तद्वायुरग्नये ददात्तस्मिन्नाधीयताम
यं। दक्षिणाग्न्यायतने। यद्दिवो नाम्रतं संबभूवत्वेसचा। तदादित्योग्न
ये ददात्तस्मिन्नाधीयतामयं। आहवनीयायतने। तूष्णीमितरयोः।७

शि॰ आ॰ त्समुद्रान्मधुमाँ२ऽउर्मिरागात्साम्राज्यायप्रतरांदधानाः। अमीचयेमघवा
४८ नोवयंचेषमूर्जंमधुमत्संभरेम। सूदंगार्हपत्ये। एवमितरयोः। इयत्यग्रआसीः
वराहविहतंगार्हपत्ये। एवमितरयोः। अग्नेदेवाःप्रथमानांपृथिव्यदेवैर्गुप्ताव्य
सर्पोमहित्वा। अदृंहत। शर्कराभिस्त्रिविष्टप्यजयोलोकान्प्रदिशश्चतस्रः।
शर्करागार्हपत्ये। एवमितरयोः। शर्कराभागंनिवपन्द्वेष्यवधंमनसाध्यायति
पाप्मनोवधोऽस्यात्। यास्तेअग्निवास्तनुवोजातवेदोयाअंतरिक्षउत पार्थिवी
र्याः। ताभिःसंभूयसगणःसजोषाहिरण्ययोनिर्वहहव्यमग्ने। उत्तरतःसभा
राणांहिरण्यमुपास्यति। पाप्मनेरजतंद्वेष्यायप्रददाति। द्वेष्याभावेभिरस्यै ४८
न। अपउपस्पृश्य। चंद्रमग्निंचंद्ररथंहरिव्रतंवैश्वानरमप्सुषदंसुवीरं।

त्रिगार्हंत्यूर्यींतविषा: निराहृतंमूर्णिंदेवास इह सुश्रियं दधुः। उपास्तमग्निमं
न्नयते। पुष्करपर्णउदुम्बरशमीविकंकतोश्वत्थोशनिहतोपलाश्चेति सप्त
वानस्पत्याः। तानेकैकशः पूर्ववद्विभज्य सर्वेषां गार्हपत्यभागानादाय। इ
तः प्रथमं जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः। सगायत्र्या त्रिष्टुभा जग
त्या देवेभ्यो हव्यं वहतु प्रजानन्। तान्सह देवगार्हपत्यायतने निवपति। ए
वमितरयोः। पञ्च संभारपक्षे पुष्करपर्णविकंकतरहिताः पञ्च। संयावत्प्रिया
स्तनुवः सं॰ स्तनुवो मम। गार्हपत्यायतनस्थोषान् सिकताश्च संसृजति।
एवमितरयोः। मंत्रः सं जानामि हृद्यानि॰ प्राणो अस्तु वः। सर्वान्संभारान्
संसृजति। गार्हपत्यस्यान्यायएवमितरयोः। ऋतं स्तृणामि पुरीष्यं पृथिव्या

हि॰अ॰

मृतेध्यग्निमादधे सत्येध्यग्निमादधे। दिवस्त्वा वीर्येण पृथिव्ये महिम्ना। अंतरि
४२ स्य क्षैपोषेण सर्वपशुमादधे। गार्हपत्यायतनस्थान्सर्वान्स भारान्स्संस्पृष्टान्क
ल्पयति। समीकरोति। एवमितरयोः। ततउद्धृत्सुरश्मिषु ब्राह्मौदनिकस्य भ
स्मापोह्य। चितिस्कक्र। चित्त॰ता माध्वर्युः। ब्राह्मौदनिकस्थाने प्रागग्रे अ
रणीसहस्रंदधाति। ततउत्तरारण्येर्मूलतः अष्टांगुलं छित्वा रं शाकल
छित्वा तस्य मूलं काष्ठं मंथस्याग्रभागबिले दृढं प्रोतं कृत्वा शाकलं यं अ
धरारणेर्मूलतो ष्टांगुलं दे शाख बिले समवधायतिर्यक्काष्ठेनोपरिष्टीउधि
त्वा रज्ज्वा मथति। प्राउ॰मुखो ध्वर्युः। सहाग्नेग्निना जायस्व सह प्रजया सह ४९
रय्या सह पशुभिः सह ब्रह्मवर्चसेन। उपतिष्ठन्स्वेमंथानं। मथ्यमानेग्नो

सहपुष्पा

चतुर्होतृन्यजमानं वाचयति। चित्तिः स्रुक्। सामाध्वर्युः। पृथिवी होता। पृ
ष्ठस्यतिरुपवक्ता। अग्निर्होता। अश्विनौ मित्र उपवक्ता। सूर्यं ते चक्षुः। वातं॰
पृथिवीं शरीरैः। महाहविर्होता। सत्यहविरध्वर्युः। अच्युतपाजा अग्नीत्। स
ह्याग्नेति सकृदेव मंत्रः। विचेष्टापृथक्क न्यायात्। यत्र भेदे मंत्रावृत्तिरिति के
चित्। अगन्नग्निर्होता पूर्वैः। पूर्वेभ्यः पवमानः पावकः शुचिरीड्यः। जा
तमग्निमभिमंत्रयते। यजमानः। प्रजापतेस्त्वा प्राणेनाभिप्राणिमि। पूष्णः॰
जीवात्वे पुण्याय। जातमग्निमभिप्राणिति। नासिकयाश्वासं मुंचति। अहं
त्वदस्मि मदसि त्वं॰ लोककृज्जातवेदः। जातमभिमंत्रयते। अध्वर्यो व॰ ते
ददामि। वरं ददाति। अध्वर्युर्वरं प्रतिगृह्णाति। यजमानः वाचं विसृजते। अ

हे॰ आ॰
५०

त्रक्षौमे वाससी परिदधाते यजमानः पत्नी च। आधानसमाप्तेः। ते वाससी अ
प्रत्तेग्न्याधेये अध्वर्यवे ददतः। अध्वर्युः। अजीजनन्नमृतं मर्त्यासो॰ मभि
संरभंतां। जातमग्निं शरावादिसहितमंजलिना प्रतिगृह्णाति। भूर्भुवः।
आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि। भूर्भुवः स्वर्भूम्ना द्यौर्वरेण्यां त॰
मन्नाद्यायादधे। आयं गौः पृश्निरक्र॰ प्रयन्त्सुवः। धर्मः शिरस्तदयमग्निः।
संप्रियः पशुभिर्भुवत्। छर्दिस्तोकाय तनयाय यच्छ। प्राणे त्वामृतमादधामि।
अन्नादमन्नाद्याय। गोप्तारं गुप्त्यै। अग्ने गृहपते परिषद्य। दिवः पृथिव्याः।
पर्यंतरिक्षाल्लोकं विद यजमानाय पृथिव्यास्त्वा मूर्धन्नसीदयज्ञिये लोके यो ५०
नो अग्ने निष्ठ्यो यो निष्ठ्यो भिदासतीदमहं तं त्वयाभिनिदधामि। तमग्निंगा

र्हपत्यायतनेसंभारेषु प्रतिष्ठापयति। वत्सादीनां मित्रयुवांतानां भृगूणां आ
दित्यानां त्वा त्वेवस्दुसं त्रस्य स्थाने भृगूणां त्वा देवानां व्रतपते व्रतेनादधामी
तिमंत्रं ब्रूयात्। आयास्यगौतमइत्यादि द्वादश विष्णुवृद्धांतानामंगिरसां ओंगि
रसां त्वा देवानां व्रतपते व्रतेनादधामि इति मंत्रं ब्रूयात्। एवयोर्मंत्रयो देवाना
मितिपदं केचित्प्रक्षिप्यते तत्सूत्रांतरीयं। भृग्वंगिरोवर्ज्यानां सर्वेषां ब्राह्मणा
नामादित्यानां त्वेतिमंत्रं ब्रूयात्। नक्तं गार्हपत्यमादधाति। रात्रिशेषे। दिवा
हवनीयं। दिवसप्रास्युत्तरं अर्धोदिते सूर्ये। पुरोदयं वा आहवनीयमथ्यादधाति
ब्रह्मवर्चसकामस्य यजमानस्य सूर्यो... योत्तरं गार्हपत्यादीन् सर्वानादधा
ति। यज... याभ्यां याभ्यां व्याहृतीभ्यां येन येन यथ्या व्योधानेनयाभ्यां या

॥

हि॰आ॰ ९१ भ्यां सार्पराज्ञीभ्यां येन येन च घर्मे शिरसाध्वर्युरादधाति सर्वं त्वेतेन तेनो प्रति
ष्ठते। भूर्भुवः सुवरिति व्याहृतयः। आदित्यानां त्वा भृगूणां त्वा अंगिरसां त्वेति
यथर्ष्याधानानि। घर्मः शिरः वातः प्राणः। अर्कश्चक्षुः। त्रीणि ध॰ शिरांसि
भूमिर्भूम्ना। आयं गौः। त्रिंशद्धाम। अस्य प्राणात्। वतस्त्रः सार्पराज्ञः। य
ज॰ भूर्भुवः आदित्यानां त्वा॰ भूमिर्भूम्ना॰ आयं गौः॰ घर्मः शिरः॰ अपरेण
गार्हपत्यं तिष्ठन्नुपतिष्ठते। भृगूणामंगिरसां च। अध्वर्युर्वह्निशोषः। ध्वर्युः
गार्हपत्यं परिस्तीर्य ओषधीराज्ये वधाय मिश्रयित्वे सर्थः। गार्हपत्ये ति
तिस्रः समिध आ॰ धाय नवा। याते अग्ने पवमाना पशु शुचिया तनूः पृ
थिव्यां याग्नौ या रथंतरे या गायत्रे छंदसि। दं तेना मव रुंधे तस्यै ते स्वाहा। ९१

या

अग्नेः पवमानायै प्रियायै तन्वा इदं। याते अग्ने पावकाप्सु प्रैतनूर्यांतरिक्षे
यावा यौ यावामदेव्ये या त्रैष्टुभे छंदसीदं ते तामवरुंधे तस्यै ते स्वाहा। अग्नेः पाव
कायै प्रियायै तन्वा इदं। याते अग्नेश्शुचिः प्रिया तनूर्यादि। वियादिसेया बृहति सूर्य २
या स्तनयित्नु या जागते छंदसीदं ते तामवरुंधे तस्यै स्वाहा। अग्नेः शुच्यै प्रि
यायै तन्वा इदं। तिस्रः पवमानाहुतीराज्यमिश्रौषधीभिर्जुहोति। अग्निराम
तार्थं हस्तेनैव होमः बौधायनीये सर्वौषधिमंजलिना जुहोतीत्युक्तत्वा
त्। जुह्वा होमस्त्वाहवनीय एव नान्येषु॥ वरः नात्र। यजमानः। स्रुगार्हपत्यमभि
द्रहन्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत्। अग्ने सपत्नाँ अ॰ बाधमा
नो रायस्पोषमिषमूर्जमस्मासु धेहि। आहितं गार्हपत्यमुपतिष्ठते। अध्वर्युः

हि॰आ॰ ५२

गार्हपत्येग्निमणयनान्यादीपयति।उपप। :नार्थं सिकताः। गर्हच्छराबाद्वि

मान्नेउपकल्पयति।अग्न्युद्धरणार्थं महस्राचं नयथः।बहिरंगारपातौ न भवति।

तथा।हिरण्यं वरं च।परिकर्मिणः अग्निं पुरस्तात्धारयंति।।यजु॰।अ॰ त्राहवनीय

दक्षे गार्हपत्यस्य पश्चादुपविश्य आयुष्कामो अजस्रमाधास्ये इति संकल्पं

करोति।गतश्रियस्तु न संकल्पः।अथ मं॰ ऊर्जस्त्रे बलाय त्वोद्यच्छे वृषण्यो शुष्मा

यायुषेवर्चसे।सपत्नतूरसि [illegible] सि वृत्रतूर्यस्ते देवेषु माहिमा सुवर्गः यस्त

आत्मा पशुषु ; र्नं वृष्टः।पुष्टिर्या ते मनुष्येषु पप्रथे।तया नो अग्ने जुषमाण एहि।

दिवः पृथिव्याः पर्यंतरिक्षाद्।तात्सभुभ्यो अध्योषधीभ्यः।यत्र यत्र जातवेदः ५२

संबभूथ ततो नो अग्ने जुषमाण एहि।उद्धुत्वा निम्नेदेवा अग्ने भरंतु चित्तिभिः

सनो भव शिवतमः सुप्रतीकोवि भावसुः। वामदेव्ये गीयमाने चतसृभिर्गार्हप
त्यादाहवनीयमुद्धरन्ति। प्रणयनीयमिध्ममुद्यच्छति। आग्नीध्रः उपयतेग्नौ
अध्वर्युणा धार्यमाणेऽश्वो विप्यागारादितः शुध्यं लौकिकमग्निमाहृत्य लौकि
कारण्यामेथिश्वा वा सूत्रान्तरीये कृ योनिस्त्वपक्षे गार्हपत्याद्वा दक्षिणाग्निमा
हृत्याति। भुवः। आदित्यानां त्वा देवानां धामभिः। आयं गौः० यन्तु वः। त्रिंशद्धा
मविराजति० वहद्युभिः। वातः प्राणस्तदयमग्निः। प्रियः पशुभिर्भुवत्। स्वदि
नं तेऽकायतनयाय पितुं पच। अग्ने त्वं पामयो भुवः सुशेवः द्विवः पृथिव्याः पर्यं
क्षाल्लोकं विंदयजमानाय पृथिव्यास्त्वा मूर्धन्सादयति यज्ञिये लोके यो नो अग्ने नि
ष्ट्यो योनिभ्यो भिदासतादमहं तं त्वया भिनिदध्यामि। पूर्वोक्तेष्वन्यतरमग्निं प्र
८ अधस्तादुपयमनीभिरुपयच्छति। उपरी[illegible] [illegible] भर्युमच्छति ८

१०आ०

रावादौगृहीतं प्राङ्मुख एव दक्षिणाग्न्यायतने संभारेषु प्रति ष्ठापयति पय

५३ श्वा श्वाः स्यमानं दक्षिणाग्निं द्वितीयया व्याहृत्या पथव्याधानेन द्वितीयत्वतीया। यजमा०

भ्यां तार्पराज्ञीभ्यां द्वितीयेन च घर्मशिरः सोपतिष्ठते। भुवः। आदित्यानां० त्र्यायगो:०

त्रिंशद्धाम। वातः प्राणः० एतैर्मन्त्रै रुपस्थानं। अध्वर्युरन्यहस्ते ग्निं दत्वा दक्षिणा

ग्निं परिस्तीर्य पुर्ववदाज्यौषधीभिः पवमानाहुतीभिर्जुहोति। अध्वर्युः। यावाजिन्न

ग्नेः पवमानः पशुषु प्रियातनूस्तामावह। यावाजिन्नग्नेः पावकाप्सु प्रियातनूस्ता सा

वह। यावातिन्नग्नेः सूर्येशुचिः प्रियातनूस्तामावह। अश्वस्य दक्षिणे कर्णे त्रिस्त्रा

ग्नितनूर्यजमानं वाचयति। विक्रमस्व महाँ असि वेदिषन्मानुषेभ्यः। त्रिषु

लोकेषु जागृहि। नजयाचयधनेन च प्राचीमनुप्रदिशं प्रेहि विद्वानग्नेरग्नेपुरो अग्नि र्भवेह। द्विपदं ५३

चतुष्पदे। क्रमध्यमग्निनानाकमुरव्यं॰ हस्तेषु बिभ्रतः॥ दिवः पृष्ठं॰ सुवर्गत्वा
मिश्रा देवेभिराध्वं। तिसृभिरभ्वगथमाः शंचो गच्छंति। सर्वेषां मंत्रः। ब्रह्म ..
जमानौ दक्षिणतो गच्छतः। उत्तरत इतरे। अध्वर्युरग्निं जानुदघ्ने धृत्वा प्रथमं दे
शात्तृतीयभागं हराति। ततो नाभिदघ्ने द्वितीयं। तत आस्यदघ्ने तृतीयं। अग्निमादे
यं च नव्य चेति। पूर्वमग्निं हरति पश्चादन्वेति। तस्य दक्षिणतो वा परिगच्छे वहर
ति। यण इमा उमामुपतिष्ठंतु॰ दिदीहि जातवेदः। मध्यदेशो हि कर्मामग्निमभिमंत्र ण
यतो अध्व॰ अर्धमार्गे भूमौ हिरण्यं निधायतिष्ठति। यजं॰ अध्वर्यो वरं ते ददामि। वरं
ददाति। अध्व॰ वरं दत्तेनाकोसि ब्रध्नः प्रतिष्ठासंक्रमणं। हिरण्यमतिक्रम्यायं गच्छ
ति। ब्रह्मा। बृहस्पते परि दीया रथेन रक्षोहामित्रां॰ अपबाधमानः। प्रभंजन्सेनाः

हि॰ श्रा॰ ५४

अग्रणो युधाजयन्नस्माकमध्वविता रथानां विहारस्य दक्षिणतो रथं रथचक्रं
वा त्रिः परिवर्तयति। अध्व॰ यावच्चक्रं त्रिः प्रवर्त्तते तावत्कालमध्ये॥ अभिष्ठा
द्विष्वाः पृतना अरातीस्तदग्निराह तदु सोम आह बृहस्पतिः सविता तन्म आ
ह पूषा मा धात्सुकृतस्य लोके॥ प्राङ्मुखमश्वं दक्षिणेनाग्रपादेन संभारानाक्रम
यति। पार्श्वतो वा संभाराणां उत्तरदिक्स्थं भागं आक्रमयति॥ यथाहितस्या
ग्नेरंगारा अभ्यावृत्य पदे आसमिध्यन्ते तथा॥ यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात्॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं म
हि जातं ते अर्वन्॥ अश्वं आहवनीयस्य पुरस्तान्नीत्वा प्रदक्षिणं पर्यानी ५४
य प्रत्यङ्मुखं दक्षिणेनाग्रपादेन तदेव पदं पुनराक्रमयति॥ अश्वाभावे

न

अनडुत्पदे आदधीत ॥ अनड्वांस्तस्युवैवानेयः ॥ नजरठः ॥ तस्मिंनाहवनीयायतनए
वांतःपादेपरिकर्मभिर्ध्रियमाणेस्तति ॥ अथ॰ यदिदंदिवोयदिदःपृथिव्याःसंभि
दानेरोदसीसंबभूवतुः ॥ तयोःपृष्ठेसीदतुजातवेदाः शंभूःप्रजाभ्यःस्तनुवेस्यो
नः ॥ हस्तस्थमेवाग्निमभिमंत्र्य ॥ भूर्भुवःसुवः ॥ आदित्यानांत्वादे॰ भूमिर्भूम्ना
द्यौ॰ अस्यप्राणादपानंत्यंतश्चरतिरोचना ॥ व्यख्यन्महिषःसुवः ॥ अकेभ्यस्तु
स्तरसौसूर्यस्तदयमग्निःसंप्रियःपशुभिर्भुवत् ॥ यत्तेशुक्रशुक्रंवर्चःशुक्रात
नूःशुक्रंज्योतिरजस्रं तेनमेदीदिहितेनत्वादधेग्निनाग्नेब्रह्मणा ॥ प्राणंत्वा
मृतआदधाम्यन्नादमन्नाद्याय गोप्तारंगुप्त्यै ॥ अग्नेसंम्राडजैकपादाह
वनीयदिवःपृथिव्याःपर्यंतरिक्षाल्लोकंविंदयजमानायपृथिव्यास्त्वामूर्ध्ने

हि॰ आ॰ सीदयज्ञियलोकेयानोअग्नेनिष्ठोभिदासतीदमहंतंत्वयाभिनिदधामि। यु
५५ त्तायज्ञियेसाग्निरुहतिश्यैतेचगीयमानेआहवनीयायतनेसंभारेषुअग्नि
प्रतिष्ठापयति। अग्नौनिहितेवारवंतीयंगायति। यज॰ भूर्भुवःसुवः। स्मादित्यानां॰
भूमिर्भूम्ना॰ अस्यप्राणादपान॰अर्कश्चक्षुः॰ नाग्नेब्रह्मणा। सर्वाभिर्व्याहृति
भिर्यथर्थ्याधानेनप्रथमोत्तमाभ्यांःसर्पराज्ञीभ्यामुत्तमेनघर्मशिरसोपतिष्ठते।
आहवनीयमाधीयमानमध्वर्युः। आनशेव्यानशेसर्वमायुर्व्यानशे। अ। हितमा
हवनीयमुपतिष्ठते। आहवनीयंपरिस्तीर्यपूर्ववदाज्येनौषधीभिश्चाग्निशान्त
नार्थंपवमानाऽग्नीन्दुकाजुहोतिहस्तेनवा। यातेअग्नेपवमानापशुषु॰ यांते ५५
अग्नेपावकाप्सुप्रियात॰ यातेअग्नेसूर्येशुचिःप्रिया॰ अजवाआनशाइत्युपस्था

नं।यज० आनशेव्या नशो सर्वमासुर्व्यानशो। येते अग्ने शिवे तनुवौ। विराट्‌ च स्वरा
ड्च। ते मा विशतां ते मा जिन्वतां। येते अग्ने शिवे तनुवौ सम्राट्‌चाभिभूश्च। ते मा
विशतां ते मा जिन्वतां। येते अग्ने शिवे तनुवौ। विभूश्च परिभूश्च ते मा० येते अ
ग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते मा विशतां० यास्ते अग्ने शिवास्तनुवः ता
भिस्त्वादधे। आरोनेशिवाभिश्च तनूभिराहवनीयमुपतिष्ठते। आहितं अध्व
र्युः सभ्यावसथ्यौ वा। लौकिकमग्निमाहृत्य मथितं वाहवनीयाद्वा तूष्णीं यथ
र्थाधानेनैवाधानं कुर्यात्। शमनहोमास्तु मंत्रेण। यजमानोपस्थानेऽध्वर्यु
वत्। एकेषां मते ऽन्याधेये प्रतिषिद्धानि प्रतिषिद्धौ सभ्यावसथ्यौ। अध्वर्युः। सामानि
अग्न आयूंषि० आरे बाधस्व दुच्छुनां स्वाहा। अग्नये पवमानायेदं० अग्ने

हि॰ आ॰

५८

पवस्वस्वपा॰ दधत्पोषꣳरयिंमयिस्वाहा। अग्नयेपवमानायेदं॰ अग्नेपावकरो
चिषा॰ यक्षिवस्वाहा। अग्नयेपवमानायेदं॰ अग्निर्ऋषिः पवमानः पांचजन्यः
पुरोहितः। तमीमहेमहागयꣳस्वाहा। इयंतृतीयामेकेसमामनंति। तदादध
द्रयिंमयिपोषमितिद्वितीयमंत्रपाठः। तिस्रभिर्गार्हपत्येतिस्रआश्वत्थीःसमिध
आदधाति। एवमितरयोः। सभ्यावसथ्ययोश्च। ततः शमीमयीर्घृतान्वक्ताववक्ष्य
माणमंत्रैस्तिस्रस्तिस्रः। समुद्रादूर्मिर्मधुमाꣳउदार॰ तस्यनाभिःस्वाहा। अग्न
यइदं॰ वयंनामप्रब्रवाम॰ ह्वोरएतत्स्वाहा। अग्नयइदं॰ चत्वारिशृंगात्रयोअ
मर्त्याꣳआविवेशस्वाहा। अग्नयइदं॰ तिस्रभिर्गार्हपत्येतिस्रआदधाति। ए
वमितरेषु॥ पेड्डो अग्नेदीदिहिपुरोनोजस्रयासूर्म्यायविष्ठ। त्वाꣳशश्वंतउ

५९

पयं तिवाजः स्वाहा। अग्नय इदं। औदुंबरीः समिधं गार्हपत्य आदधाति। ए
वमितरेषु। विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे॥ यस्माद्योनेरुदा
रिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे स्वाहा॥ अग्नय इदं। वैकंकतीं गार्हपत्ये एव
मितरेषु। तां सवितुर्वरेण्यस्य चित्रां धारां पयसा महीं गां स्वाहा॥ सवित्र इदं। शा
मीमयीं समिधं गार्हपत्ये। एवमितरेषु। ततः प्रातरग्निहोत्रस्यावृता तूष्णीमात
रग्निहोत्रं जुहोति॥ सर्वं तूष्णीमिति प्रयोगवैजयंत्यां॥ ध्यानमात्रमेव तूष्णीमिति
सूत्रांतरात्परिगृहीतं शिष्टैः॥ तदेवमनुवचनं॥ यजे। पुरस्तात्पूर्णाहुतेः। स्विष्ट
त्वी हितिश्च स्विष्टिहितिश्च। सुदाम्नी चामनिश्वानाऊतिश्च तिर्यक्तिः॥ एतास्ते अग्ने

आ॰हि॰
८२

घोरास्तनुवः॥अमर्त्योमर्त्यस्तानुगच्छंतुयोस्मान्द्वेष्टि यंच वयं द्विष्मः॥घोराभिस्तनूभिः
राहवनीयमुपतिष्ठते॥अध्वर्युः॥जुहूंस्रुवंचसंमृज्याहवनीयंपरिस्तीर्यचतु
र्गृहीतेनाष्टगृहीतेनद्वादशगृहीतेनवास्रुचंपूरयित्वाग्रेणाहवनीयंगत्वा
हवनीयेसमिधमाधाय॥सप्ततेअग्नेसमिधःसप्तजिह्वाः॥म॰ घृतेनस्वाहा॥तिष्ठ
न्नाहवनीयेपूर्णा ... हुतिंजुहोति॥अग्नयेसप्तवत इदं॰
यज॰अध्वर्यो वरंतेददामि॥आवयित्वावरंददामि॥इयंपूर्णाहुतिस्तस्मि
काग्निहोत्रस्थानेवाभवति॥तदानस्मीमग्निहोत्रंजुहोति॥अध्वर्युः॥
पुनश्चतुर्गृहीतेनाष्टगृहीतेनद्वादशगृहीतेनवास्रुचंपूरयित्वा॥येअ
ग्नयोदिवोयेपृथिव्याः समागच्छंतीषमूर्जंदुहानाः॥तेअस्मोअग्नयोद्रवि

यं द्वेष्मः॥मीता आहुतिः॥भाजोभूत्वा यथालोकं पुनरस्तं परेत स्वाहा॥
पूर्ववद्दक्षिणतस्तिष्ठन् द्वितीयां पूर्णाहुतिं जुहोति॥ अग्निभ्य इदं॥ अत्रा
नूक्तमपि स्वशाखावाक्यं मंत्र... स्यागमीत्यास्वशाखावाक्यमंत्रैरध्वर्यु
णा विराजक्रमोपस्थानं कर्तव्यमिति केचन मन्यंते॥ तत्कृताहूतं॥ यज्ञ॰
येते अग्ने शिवे तनुवौ विरा॰ येते॰ संम्रा॰ येते विभू॰ येते॰ प्रभ्वी॰ या
स्ते अग्ने शिवास्त॰ दधे। उपरिष्टात्पूर्णाहुतेः शिवाभिराहवनीयमुप
स्थाय विराजक्रमैर्दक्षिणाग्न्यादीनग्नीनुपतिष्ठंते॥ अथर्वपितुं मे
गोपायान्नं प्राणेन संमितं॥ त्वयागुप्ता इषमूर्जं मदंतः शान्तं जीव म

शारदः सवीराः। दक्षिणाग्निमुपतिष्ठते। नर्यप्रजां मे गोपाय मूलं लोकस्य सं
न्ततिं आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहं। गार्हपत्यं। शांस्य भून् मे गो
पाय विश्वरूपं धनं वसु। गृहाणां पुष्टिमानंदं तांस्ते परिददाम्यहं। आहवनी
यं। स प्रथ सभां मे गोपाय द्रियं भूतिवर्धनं। विश्वजनस्य छायां तां ते परिददा
म्यहं। सभ्यं। अहे बुध्निय मंत्रं मे गोपाय श्रियं च यशश्च सह। अहये बुध्नियाय मंत्रं
श्रियं यशः परिददाम्यहं। आवसथं। सभ्यावसथ्ययोरकरणपक्षे मंत्रयोर्लोपः। आ
हवनीये संकल्पपक्षे मंत्राभ्यामाहवनीयस्योपस्थानं एवं धाग्नीन्ध्रकामतु
विराट् स्रष्टा प्रजापतेः। ऊर्ध्वारोहद्रोहिणी॥ योनिरग्नेः प्रतिष्ठितिः। सह्रूं मंत्रे ५८
णयुग पत्सर्वानग्नीमुपतिष्ठते॥ ——॥ इति हिरण्यकेशीयं पूर्णाकुसंतमन्त्री॥

धर्मं॥ ॥अथपवमानेष्टयः।ताःषट् पंचचतस्रस्तिस्रोद्वे एकावा।आग्नेया
श्चतस्रो नानातंत्राः।अनुनिर्वाप्यानां आद्ये सव्यातिरिक्ता एका।आदि
त्यस्यैके तिषट्।पंचपक्षे अनुनिर्वाप्यानां पंचानामेकैव।चतुःपक्षे।आ
ग्नेयी एका।पवमानस्य द्वितीया।उत्तरयोस्तृतीया।अनुनिर्वाप्यानां च
तुर्थी।त्रयपक्षे।आग्नेयी।पावमानी।अनुनिर्वाप्या द्वयपक्षे।आग्नेयेन
समानतंत्रा पावमानी अनुनिर्वाप्या च।एकपक्षे सत्रांतः रीत्का षट्‌ विंक्षा
न्स्याक्रियमाणा यां अनुनिर्वाप्य देवता लोपो भवती।तिनांगीकारः।इ
ष्टि द्वयपक्षं संघः करणपक्षं वा श्रित्य प्रयोगः।गार्हपत्यस्य पश्चाद्दर्भेष्वा
सीनो दर्भान्धारयमाणो यजमानः पत्न्या सह प्राणानायम्य देशकालौ

मग्निं पावक

न

संकल्प्य अग्निं पवमानेमग्निंशुचिमाग्नेयेन समातंत्रं कुर्वन्निष्यायस्ये।
५८ इतिसंकल्प्य।अध्वर्युःतेषांवाग्निषुअन्वाधानांदि ममाग्नेअद्य यज्ञायाम्इमा
मूर्जंयथातिथि।ऐषुः हविः।आमावास्यंतत्रंवत्सैः सव्रतोपायनं।वेदंकृत्वावे
दिः।इध्माबर्हिः।परिस्तरणंनोभावाग्नीःकर्मणेवां॰ पात्रप्रयोगकाले केद्य
निशत्कपालानि निर्वपणकाले।अग्नयेजुष्टं निर्वपामि।अग्नयेपवमा
नाय॰अग्नयेपावकाय॰अग्नयेशुचये॰ अग्नेहव्यं रक्षस्व।अग्नेपवमा
नहव्यं॰ अग्नेपावकहव्यं॰ अग्नेशुचेहव्यं॰ प्रोक्षणीसंस्कारांतंकृत्वा।अधि
देवनोस्यननादिप्रेषांतंकर्मसभ्यावसथ्ययोः। करणपक्षेसर्वेषांराजन्य
स्यैवेत्यापस्तंबः।नयोरकरणपक्षेनास्तीतिकृत्वानलिख्यते।अध्व॰क ५८

ल्पे तां द्यावापृथिवी कल्पं तामापओषधीः। कल्पं तामग्नयः पृथङ्मम ज्यैष्ठ्या
यसव्रताः ये ... ः समनसोंतरा द्यावापृथिवी वा संतिकावृतू अभिकल्पमा
नाइंद्रमिव देवा अभिसंविशंतु। गार्हपत्यस्य पश्चात्तिष्ठन्यथर्तु कृत्तिसामन
सीभ्यां युगपदेव सर्वानग्नीनुपतिष्ठते यथर्तुहः ग्रीष्मावृतू इत्यादि प्रोक्षणे।
देवस्य त्वा० भ्यामग्नयेग्नये पवमानायाग्नये पावकायाग्नये शुचये वा जुष्टं
प्रोक्षामि। कपालोपधाने सर्वेऽष्टाकपाला आग्नेयविकाराः। पिंडं कृत्वा।। य
थाभागं व्यावर्तध्वं० २ यथाभागं व्यावर्तेथां। इदमग्नये पावकाय० इदमग्न
ये शुचये। अंत्ययोरादेशानं। सर्वेषां मंत्रेणाभिघारणं। तेजसाग्नये जुष्टम
भिघारयामि। साग्नये ... मानाय० जसाग्नये पावकाय० साग्नये शुचये जु

ह०आ०

ष्ठम० प्रिये० आसीदं तु। यज० यज्ञास्थः सर्वतः श्रिताः सर्वतोमांभू
६० तंभाविष्यद्भूयंतांप्र्श० अयंयज्ञः। पंचहोता० अयंवेद इत्यादि० आज्ये
भागांते। अग्नयेनुब्रूहि। अवदायात्याक्रम्याश्राव्य प्रत्याश्राविते०
अग्निंयज। अग्नेरहं० अन्नादः० अग्नये पवमानायानुब्रूहि। अ
ग्निंपवमानंयज। अग्नेः पवमानस्याहं० अन्नादः अग्नये पाव
कायानुब्रूहि। अग्निंपावकंयज। अग्नेः पावकस्याहं० अन्नादः
अग्नयेशु येनुब्रूहि। अग्निंशुचिंयज अग्नेः शुचेरहं० अ
न्नादः सर्वेषांविरुत्सा... पितृंवंचतुर्धाकरणंच। दक्षिणा ६०

कालेऽग्न्याधेयिकीर्दक्षिणा दद्याति॥ अजं पूर्णपात्र मुपबर्हणं चाग्नीधे द
दाति। अश्वं त्रमुणे। धेनुं होत्रे गार्हपत्य देशे। अनड्वाहमध्वर्यवे॥ आहवनी
यदेशे। रथं गाः षट् द्वादश चतुर्विंशति परिमिता वा॥ एता अग्न्याधेयिकी
र्दक्षिणाः आग्नेयस्य दक्षिणा काले ददाति॥ आग्नेयस्यापि ता एव दक्षिणाः॥ आ
ग्नेयो वा अष्टाकपालोऽग्न्याधेयमिति श्रुतेः॥ त्रिंशन्माने हिरण्ये पूर्वयोः पवमा
न हविषोः। चत्वारिंशन्मानमुत्तरस्य। रथं गाः मिथुनौ गावौ वास स्त्रिंशन्माने
हिरण्ये चत्वारिंशन्मानं च हिरण्यं एताः साधारणाः सर्वेभ्यो ददाति॥ ३ ५ जि
तयाकृतानुमंत्रणं वर्॥ न पार्वणः॥ शेषं प्रकृतिवत्॥ इष्टिः संतिष्ठते॥
तदानीमेव अनुनिर्वाप्याय स्याय स्ये॥ अध्वर्युः॥ तेषु वाग्निषु मम अग्नेः
अयय यज्ञाय ० इमा म ज्येय थातिथिः। पेष्टं हविः॥ पौर्णमासं तंत्रं। बर्हिषात्र

ष्आ० तं। संसदृश सामिधेन्यः। ततस्त्वां त्रयो विंशतिधा। परिभोजनीयं दमुपंवर्ष
६२ परिस्तरणं। नो भाव ग्नः। कर्मणेवां। पात्र प्रयोगकाले त्रयस्त्रिंशत्कपालानि
द्वे चरुस्थाल्यौ द्वितीया स्रुचा। मेक्षणे चमसौ शेषं प्रैतिवत्। प्रणयनकाले क
अप आज्यं च प्रणयति। इक्षायत्वा। अपश्च मसमादाय प्रक्षाल्य ना। पुन
र्मन्त्रेणाज्य चमसमादाय प्रक्षालयति। चमसे अप आनीय द्वितीयेऽहं ना
ज्यमानयति। कस्त्वा गृह्णाति स त्वा गृह्णातु कस्मै त्वा गृह्णामि तस्मै त्वा
गृह्णामि पोषाय त्वा। चमसे आज्यमानयति। अनया वो गृह्णामीत्युक्त्वा।
अनया त्वा। ०गृह्णामि इत्याज्यस्य। अपउत्पूय देवस्त्वा सवितोत्पुनात्विति ६२
घृतमुत्पुनः तिः। अपोभिमन्त्र्य आज्यं देवानामिष्ये गच्छत इ। यज्ञं नयाग्रे यज्ञ
आ

प्रतिधेहि। त्वामिंद्रोवृणीतवृत्रतूर्येत्वमिंद्र[म]वृणीथावृत्रतूर्येप्रोक्षितमसि।आ
ज्यमभिमंत्रयते।ब्रह्मन्नपआज्यंप्रणेष्यामियजमानवाचंयच्छ।कोवःप्रणय
तिसवः।देवागातुविदोगातुंयज्ञायविं०ज्यतां।आज्यंप्रणयति।स्फ्येत्यविक
तं।ब्रह्मपूतमसिकस्त्वापुनक्तिसत्वापुनक्तु।निर्वपणकाले।अग्नीषोमाभ्यां
जुष्टंनिर्वपामि।अग्नाविष्णुभ्यांजुष्टंनिर्वपामि।इंद्राग्निभ्यांजु०अदित्यैजु०
विष्णवेशिपिविष्टायजुष्टं०अग्नीषोमौहव्यंरक्षेथां।अग्नाविष्णूहव्यंर
क्षेथां।इंद्राग्नीहव्यं०रक्षेथां।अदितेहव्यंरक्षस्व।विष्णोशिपिविष्टहव्यं
रक्षस्व।अँशाशस्तांतेचपुरोडाशीयविभागः।यथाभागंव्यावर्तध्वं।२यथाभा
गंव्यावर्तेथां।इदमग्नीषोमाभ्यांचाग्नाविष्णुभ्यांचेंद्राग्निभ्यांच।पुरोडाशीया

न। इदं[illegible]सं च विष्णवे शिपिविष्टाय च। सर्वथा न। ततः पुरोडाशीयान् पिन
६२ ष्टि। कपालोपधानेत्रीने कादशकपालानुपधाय। अपाग्नेऽग्ने आदेवयजं व
हश्रुवः। सिद्यधि॰ स्थाली [illegible] मुपदधाति। तथैव हवींष्यांत्रयुसं। भृगुणामंगि॰ ती
प्येध्वं। भृगूणामंगिरसां तपसा। पिष्टानि समोप्य भूर्पादेव तंडुलान्पात्रांतरे
त्लीः संवपति। हर्योस्त्वेति पिष्टान्युत्सूयदेवोवः सवितेतं डुलानु सुना। न। स
मापइति पिष्टेषानीय प्रणीता राज्यं स्थाल्यो स्त्रूष्मी मानयति। पिष्टे पुत
ना आनीय स्थाल्यो स्तूष्णीमानयति। पिंडं कृत्वा पुरोडाशा विभजति। यथा
भागं व्यावर्तध्वं। यथाभागं व्यावर्तेथां। इदमग्नाविष्णुभ्यां इदामिंद्राग्नि
भ्यां। रोपं॰ जौन। धिश्चिर लवश्यान्विभजति। यथाभागं व्यावर्तेथां। इदं मदि ६२
शा

स्येइदं विष्णवे शिपिविष्टाय। घर्मास्थ विश्वायुषः। क्रमेण स्थाल्योस्तंडुलाना
वपति। प्रथनपरिमार्जने पुरोडाशानामेव॥ अंतरितं रक्षः० सर्वेषां॥ देवस्त्वा०
पुरोडाशानां। अग्निस्ते सर्वेषां। संब्रह्मणा० पुरोडाशानामेव। आप्यायनौ। यवे
दिकरणं। उद्वासनकाले। इदमहं पुरोडाशानां सूर्यज्योतिः सर्वेषां। स्योनं ते० पुरो
डाशानां। पुरोडाशानां तत्स्मीम भिघारणं। आप्यायतां घृ० तेजसा दैवेन्द्रु० आ
प्याय० तेजसा विष्णवे शिपिविष्टाय जुष्ट० आर्द्रः प्रथ० तस्मिन्सीद। पुरोडाशा
नां। आर्द्रो भुवनस्य० चरोस्थाल्यासेह वोद्वासनं नास्ति। तस्मिन्सीद० प्रियेण आ
सीदं तु। प्रजापती स्थः सर्वतः श्रितो सर्वतो मां भूतं भ विष्यच्छ्रयेतां ः० यो नः कनी
य० महतो स्थः सर्वतः श्रितो० अयं यज्ञः० विहृतः० चतुर्होता। ऐंद्राग्नस्य पंचहो

र्ता।अयंवेदइत्यादि॰आज्यभागांतेअग्नीषोमीयेन प्रकृतिवत्प्रचर्य॥अग्नाविष्णुभ्या
मनुब्रूहि।अग्नाविष्णूयज॰अग्नाविष्णूइहंदेवयज्ययावृत्रहा॰इंद्राग्नीप्रकृतिवत्।
अदित्याअनुब्रूहि मेक्षणेनावदानं॥अदितिंयज।अदित्याअहं॰प्रजनिषीयप्रज
यायाचपशुभिश्च॥ विष्णवेशिपिविष्टायानुब्रूहि॥विष्णुंशिपिविष्टंयज॥वि
ष्णोःशिपिविष्टस्याहं॰अन्नादस्विष्टकृदादि॰ चर्वोर्विकृज्यप्राशित्रं।आर्षेयेतर र
पां।आदित्यस्येडावदानेइडापात्रेप्रक्षाल्ये निधायउपहूतेडां।आदित्यस्येडाभा
गंसर्वेब्राह्मणेयेणाहवनीयंपरित्यज्येवाशिष्टेडायाः स्वस्वभागंप्राश्य।आदित्येडा
भागंचतुर्धाविभज्य मंत्रेणऋत्विजःप्राश्नंति।चत्वारआर्षेयाःप्राश्नंतीतिश्रुतेः। ६३

चतुर्धाकरणं निर्वर्त्यैव आदित्यस्य चतुर्धाकरणानि प्रज्ञातानि कृत्वा।
इदं ब्रह्मण इत्येव चतुर्धा रमादित्यभागानामभिमर्शनं। प्राकृतिवद्दे
ष्टवभागानां। अध्वर्य्वादिस्यस्य सर्वान्भागान्ब्राह्मणे परिहृत्य एकै
कं भागं सर्वे प्राश्नंति। ब्रह्मणोप्यस्यं भागस्यात्रैव प्राशनं। सर्वे प्रा
श्नंतीति वचनात्। वैष्टवभागानां षडवत्तादि प्रकृतिवत्। धेनुमादि
त्येदक्षिणां ददाति। अन्वाहार्यमितरेषां। अन्वाहार्यस्य प्रकृतिव
त्। ब्रह्मत्वं याजमानं च। ब्रह्मन्१ कृताघे मा मा हिंसीः कृता मह्यं
शिवा भव। प्रजापतेर्भागोस्यूर्जस्वती पयस्वती प्राणा॰ अक्षितास्य
क्षिव इयं धेनुरमृतस्य पूर्णा सहस्रधारा सोक्षीयमाणा। सादाधा

हि०अ० २०दिवंचतयाधेन्वातितराणिमस्युं। ब्राह्मणाइमेओदनधेनवअहिंसंताय
६४ थाभागंप्रतिगृह्णीद्धवं॥ देवस्यत्वान्देविदाक्षिणेब्रह्मणओदनः रुद्रायगांता
स्याममृतत्वमश्यां॥ हुतानुमंत्रणवर्जितयः। चत्वारः पत्नीसंयाजाः॥ न
पार्वणः। आज्यप्रणीतां विमोके कस्त्वायोक्षी। सत्वाविमुंचतु। समुद्रंत्वाप्रहि
णोम्यक्षितः स्वांयोनिमपिगच्छ॥ अछिद्रः योनिधर्मकपालानि०रूपांच
मेस्थालीमुपचिन्वंतिवेधसः॥ पूष्मस्तामपिव्रते० प्रकृतोसर्वेषांकपालानां
सकृन्मंत्रपक्षेऽत्रापिसर्वेषामेकेहनेसकृदेवेतिमातृदत्तः॥ यानिधर्मेस्था
लीकपालान्युपचिन्वंतिशेषंप्रकृतिवत्॥ ॥इष्टिः संतिष्ठते॥ आधानअ ६४
भृतियावज्जीवंदक्षिणाग्निंगार्हपत्यदक्षिणाग्नीसभ्यावसथ्येपोवाजस्त्र

धारणं। एवं चैषामजस्रपक्षे आहवनीयस्याप्यजस्रता यावज्जीवं। तस्योद्धरण
पक्षेपि द्वादशरात्रमजस्रता। त्रयोदशदिने सायमग्निहोत्रमारभ्यार्थाया
हवनीयं गार्हपत्यादुद्धरति सोपवृत्ते कर्मणि लौकिको भवति। अग्न्याधा
नांगत्वेन शताधिकान ब्राह्मणान्भोजयेत्। अग्न्याधाने शतावरमि
तिवचनात्॥ ॥इति श्रीसत्याषाढहिरण्यकेशीसूत्रानुसार्यग्न्या
धानप्रयोगः समाप्तः॥ ॥इष्टिपूर्वाधाने तु शुक्लत्रयोदश्या[illegible]रंभः
चतुर्दश्यां सेष्ट्याधानमपर्व[illegible]स्यतस्मिन्नेवाहनि चतुर्होत्रान्वारंभणीया
दितेष्वेवाग्निषु। सायं मंत्रवदग्निहोत्रारंभस्तथैवाग्निष्टुपयसा। सोम

द्वि॰आ॰

६५ पूर्वाधानेतुआग्नेयस्थं तंआधानंसमाप्यतंदेवसें मासुरणं। पवमानह
वंषिश्चनुनिर्वाप्यानिचसंवत्सरांतेकर्तव्यानि। संवत्सरपर्यंतंसायंप्रातर
ग्निहोत्रंतूष्णीमितिशास्त्रांतरस्थंमात्रदत्तोग्रहीतवान्। दशहोतृहोमादि
मंत्रवदग्निहोत्रंद्वितीयसंवत्सरादिसायंकालेतस्यप्रतिद्वादशरात्रमनु अ
धारणमाज्यहोमश्च। सोमानंतरमेवमंत्रवदग्निहोत्रारंभइतिसुवचनामेव
प्रतिभाति। आग्नेय्येष्ट्यावाग्न्याधानसमाप्तेः। नोचेत्त्रेताग्निषुसोमयागःकथंर
स्यात्। पवमानहविषांतुवचनादुत्कर्षः तेननाग्निहोत्रोत्कर्षोपिवक्तुमर्ह
ति। अथाग्निहोत्रारंभः। आधानानंतरंसायंकालेगणेशंसंपूज्यपुण्याहं
वाचयि॰ ऋत्विग्भिःसपत्नीकोऽहतवासाअपरेणगार्हपत्यंदक्षिणेप्रासीनोदर्भौ

५

धारयमाणः पत्न्या सह प्राणानायम्य देश ॥ कालौ संकीर्त्य श्रीपरमेश्वरप्रीत्य
र्थं स्वं॰ कामोऽग्निहोत्रमारप्स्ये। अग्निहोत्रमारप्स्यमानः कूष्मांडैर्होष्यामि।
स्रुक्स्रुवौ संमृज्य। गार्हपत्ये आज्यं संस्कृत्याहवनीयं परिस्तीर्य परिषिच्य द
र्वीहोमधर्मेण यद्देवा देवहेळनमित्येकपंचाशदाहुतीर्जुहोति। उपस्थानं व
रदा॰ च। पुनः प्राणानायम्य अग्निहोत्रमारप्स्यमानो दशहोतारं होष्यामि।
पूर्ववदाज्यं संस्कृत्य। चतुर्गृहीतं गृहीत्वा। चित्तिः स्रुक्। चित्तमाज्यं। सा॰। ध्वर्युः।
वाचस्पते विधे नामन्। विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिः सोमं
पिबतु। आस्मासु नृम्णं धात्स्वाहा। वाचस्पतये ब्रह्मण इदं॰ दर्वीहोमधर्मेण जुहो
ति। पुनः सूर्यास्तानंतरं प्राणानायम्य देशकालौ संस्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं

द्वि०

सायंप्रातरग्निहोत्रं यावज्जीवं होष्यामि। त्रिंशतं वा वर्षाणि। आज्यस्यैव हो
६६ मे द्वादशरात्रं॥ त्रयोदश्यां सायमग्निहोत्रं पयसा॥ यद्वा प्रथमदिवसे सायमग्नि थ
होत्रं पयसा तदनंतरमाज्यहोमो द्वादशरात्रमिति केचित्। तदयुक्तं। एवमिद
दानीं सायमग्निहोत्रमाज्येन होष्यामि। इति संकल्प्येध्माहरणादि यजमा
नोऽध्वर्युर्वाग्निहोत्रं जुहोति। आयुर्मे यच्छ स्वस्य स्थाने भूर्भुवः सुवः। अर्पणा रे
हवनीयमग्निहोत्रमुपसादयति। व्याहृतिभिरेव संवत्सरांते प्रातरग्निहोत्रं
अथवा द्वितीयसंवत्सरादौ सायमग्निहोत्रमिति केचित्। संवत्सरे तीत इति
व्याचक्षते। प्रथममग्निहोत्राय यस्याः पयो गृह्णाति सा गौरग्निहोत्रस्य द
क्षिणा। तामध्वर्यवे ददाति॥ ॥अथान्वारंभणीया॥ आधानानंतरं गु
रुशुक्रास्तादिरहिते शुभे पौर्णमासे अमावास्ये च चतुर्दश्यामन्वारंभणीया कर्तव्या॥

प्रातरग्निहोत्रं हुत्वा। शिष्टान्ब्राह्मणान् ऋत्विजश्चामंत्र्य गणेशं संपूज्य दर्शपूर्ण
मासांगं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च कुर्यात्। पुण्याहवाचने अग्न्या
दयः प्रीयंतामिति विशेषः॥ यजमानः॥ अपरेण गार्हपत्यं दर्भेष्वासीनो द
र्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वर
प्रीत्यर्थं स्वर्गकामो यावज्जीवं दर्शपूर्णमासाभ्यां यक्ष्ये। असति बाधके। त्रिं
शतं वा वर्षाणि। स्वर्गकामनायां सत्यां प्रयोगभेदेन कामविशेषः। [illegible]
वरणं। उद्धरणपक्षे द्वादशरात्रमध्ये पौर्णमासप्रारंभे अत एवाग्नयः। नोत्स
र्गेनाग्न्युत्पाहवनीयस्योद्धरणं। द्वादशरात्रमाश्वपदिकं एवाग्निहोत्रं हु
तोत्सर्गः। सायंकालेन्यमाहवनीयमुद्धराति। त्रयोदशे कोचिदन्य

हिं°आ°

६७ शारिवनोद्गारदराचमध्ये पौर्णसमाप्तौ आश्वपदिकोत्सर्गं कुर्वंति। तदस्माकं
विरुद्धमेव। यजमानः। दर्शपूर्णमासावारप्स्यमानः कूष्मांडैर्होष्यामि।
अध्वर्युः। अग्निं विहृत्य पूर्वोक्तप्रकारेण कूष्मांडहोमं करोति। उपस्था
नं वरदानं च याजमानं। यजमानः। दर्शपूर्णमासावारप्स्यमानः। चा
तुर्होतारं होष्यामि। अध्वर्युरुत्सृज्याग्निं पुनः प्रणीय गार्हपत्ये आ
ज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वा हवनीयं परिस्तीर्य। पृथिवी होता द्यौ ६७
रध्वर्युः। रुद्रोऽग्नीत्। बृहस्पतिरुपवक्ता। वाचस्पते वाचो वीर्येण।

संभृततमेनायक्ष्यसे। यजमानाय वार्यं। आसुवस्करस्मै। वाचस्पतिः
सोमं पिबति। जजनदिंद्रमिंद्रियाय स्वाहा। वाचस्पतये ब्रह्मण इ॰ दर्विहो
मधर्मेण जुहोति॥ यज॰॥ दर्शपूर्णमासावारप्स्यमान सारस्वतौ होमौ हो
ष्यामि॥ ॐ॰ उत्सृज्याग्निं पुनः प्रणीयाज्यं संस्कृत्य चतुर्गृहीत्वा पूर्णा
पश्चादुत पूर्णा पुरस्ता॰ दयंता२ स्वाहा॥ पौर्णमास्या इदं॰ दर्विहोम
धर्मेण जुहोति॥ पुनश्चतुर्गृहीत्वा॥ यत्ते देवा अदधुर्भागधेय॰ सुभ
गे सुवार२ स्वाहा॥ अमावास्याया इदं॰ यजमानः॥ श्रीपरमेश्वरप्री
त्यर्थं दर्शपूर्णमासावारप्स्यमानोन्वारंभणीयेष्ट्या यक्ष्ये। स्वस्ति नः

रणं। अध्वर्युः। उत्तरज्याग्निं पुनः प्रणीयान्वाधानादि॰ चतुर्होत्रर्थं प्रणीत एवाग्ना
वन्वारंभणीया कर्तव्येत्येके। ममाग्ने॰ अद्य यज्ञाया। इमामूर्जं चतुर्दशीये प्रवह
त्वान्वारंभणीयं हविरिदमेषांमयि। पौर्णमासं तंत्रं। बर्हिषाव्रतं। नो भावग्नी॰ क
र्मणेवां॰ पात्रसं॰ सादनकाले एकत्रिं॰ शत्कपाल्यनि चरुस्थालीमेक्षणेन सह॥
अन्वाहार्यस्थालीवर्जं प्रकृतिवत्। निर्वपणे। देवस्य॰ भ्यामग्ना विष्णुभ्यांजुष्टं नि
र्वपामि॰ दे॰ भ्यां॰ सरस्वत्यै जुष्टं॰ दे॰ भ्यां॰ सरस्वते॰ देवस्य॰ भ्यामग्नयेभगिने
जु॰ अग्नाविष्णू हव्यं॰ रक्षेथां। सरस्वति हव्यं॰ सरस्वन्हव्यं॰ अग्ने भागिन्ह॰
प्रोक्षणे। देव॰ भ्यां॰ सरस्वत्यै सरस्वते ग्नये भगिने वो जुष्टं प्रोक्षाम्यग्नाविष्णु ६८

भ्यां अंशावस्थां ते। यथाभागं व्यावर्तध्वं। त्रयाणामेको राशिः। एकस्यैकः।
इदमग्नाविष्णुभ्यां सरस्वते चाग्नये भगिने च। पुरोडाशीयानभिमृश
ति। इदं सरस्वत्यै चार्थान्। उपधाने अग्नाविष्णोमीयवदेरां कोदके
पालान्युपधाय। अपाग्ने॰ आदेव॰ ध्रुवासि पृथिवि॰ धूहस्थालीमुपद
धाति। आग्नेयं वद्वादशकपालमुपदधाति। पंचकृत्वश्छिदसि। आग्ने
व यं द्वाकपालं। पिष्टान्युत्पूयनं डुलानुत्पुनाति पिष्टेषु प्रणीता आनी
य स्थाल्यामानयति तथैव तप्ताः। पिंडं कृत्वा। यथाभागं व्यावर्तध्वं।
यथाभागं व्यावर्तेथां। इदं सरस्वते इदमग्नये भगिने। अंसयो।

ह्रव्या० निर्देशः प्रथममधिश्रित्य घर्मास्त्वधिश्रायुषः॥ स्थाल्यां तंडुलानावपति।
पर्यग्निकरणं। उद्वासने इदमहं पुरोडाशानां। सूर्यज्योतिः सर्वेषां। स्यो
६९ नं मिव। आप्यनिनयनं तेवेदिकरणं। सूर्यज्योतिः सर्वेषां। स्योनं २ आग्ना
पुरोडाशने।३ वैष्णवस्य। तूष्णीमभिघारणं। आप्यायतां घृतं० तेजसा सरस्वत्यै जुष्टमभि०
तेजसा सरस्वते जु० जसाग्नये भग्निने जु० आद्रो भुवनस्य० वरो॥ त
स्मिन्सीदंति पुरोडाशानामेव। प्रियेण० सीदंतु। प्रजापतिरसि स० यू
यज्ञास्तु सर्वतः। श्रिता स० छुयंता० अयं यज्ञः० ममाग्नेश्च तुर्होता। ६९
अयं वेद इत्यादि आग्नाविष्णुया मनुब्रूहि। अग्नाविष्णू युज। अ

ग्नाविस्नोरहं॰वृत्रहा।सरस्वत्याअनुब्रूहि।सरस्वतींयज।सरस्वत्याअ
ते हं।वाचमन्नाद्यं॰सरस्वंतंनुब्रूहि।सरस्वंतंयज।सरस्वतोहं॰अन्नादः।अ
ग्नयेभगिनेनुब्रूहि।अग्निंभगिनंयज।अग्नेर्भगिनोहं॰अन्नादः।जुह्वां
द्वादशगृहीतंगृहीत्वादर्विहोमधर्मेणद्वादशाज्ययांजुहोति।चित्तंचस्वाहा।
चित्तायेदं॰चित्तिश्चस्वा॰चित्तयइदं॰आकूतंच॰आकूतायेदं॰आकूतिश्चं॰आ
कूत्याइदं॰विज्ञातंच॰विज्ञातायेदं॰विज्ञानंच॰विज्ञानायेदं॰मनश्चस्वा॰म
नसइदं॰शक्करीश्च॰शक्करीभ्यइ॰दर्शश्च॰दर्शायेदं॰पूर्णमासश्च॰पूर्ण
मासायेदं॰बृहच्च॰बृहतइदं॰रथंतरंचस्वाहा।रथंतरायेदं॰पुनःसकृद्गृहीत्वा।
प्रजापतिर्जयानिं॰बभ्रुवस्वा॰प्रजापतयइदं॰पुनःसकृद्गृहीत्वा।अग्नेबत्त

1

आ॰ दसहृञ्जआक्रमप्राणायमेदाः। अभिशस्तिकृतेनाभिशस्तेन्यायास्येज
७० नतायेश्रेष्ठ्यायस्वाहा। अग्नयइदं॰ स्विष्टकृतादि॰ अंत्यानांत्रयाणांविल
ज्यष्ठाशित्वं। तेषामेवचतुर्थीकरणं। ब्रह्मणीब्रह्मणीस्थोब्रह्मणेवां॰ ऊता
द्यौमामाहिं॰ सिष्टावऊतौमह्यं॰ शिवौभवतं। प्रजाप॰ तेभ्योगौस्थउर्जस्वंतौ
मे पयस्वंतौप्राणापानौपातं॰ समानव्यानौमेपातंम क्षितौस्थोक्षित्यैवांमा
मेक्षेषाथाममुत्रामुष्मिन्लोके। इमौमिथुनौगावावम्तस्यपूर्णौसहस्वधः
रानुत्सारक्षीयमाणौ। तौदध ऊ॰ पृथिवीमंतरिक्षंदिवंचताभ्यांगोभ्यामति
तराणिमृत्युं। ब्राह्मणाइमौमिथुनौगावान ऊ॰ संतः प्र॰ देवस्यत्वा॰ देविद ७०
क्षिणेरुद्रायगावौताभ्याममृत॰ ऊतानुमं त्रणवद्रुज्जितयः। नपार्वणः।

मुदानव्यानौमेपात

इष्टिः संतिष्ठते। संतिष्ठतेन्वारंभणीया पौर्णमास्यां प्रातरग्निहोत्रं कृत्वा केशश्मश्रू
णि वापयित्वा अपरेण गार्हपत्यं दर्भेष्वासी० संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं दर्शपू
र्णमासाभ्यां यक्ष्ये ३ समुदायसंकल्पं कृत्वा। पुनः पौर्णमासेष्ट्या यक्ष्ये। इति सं
कल्पं कुर्यात्। दर्शे तु दर्शेष्ट्या यक्ष्य इत्येव॥ ॥अथ पुनराधेयं॥ तत्र निमित्ता
नि। अग्न्याधाने कृते तस्मिन्नेव संवत्सरे यजमानस्य ज्यानिं पुत्रमर्त्यौ वान्वेति
स्वेन वांगेन विरुध्यते न वर्धते तिस पुनराधेयं कुर्वीत। तत्र सावन संवत्सरमध्ये
जाते निमित्ते सति कर्तव्यं। पौर्ण ..सेष्ट्यनंतरं जाते निमित्ते दर्शपर्यंतमग्निहो
त्रं नु कुर्यात्। अमावास्यायामुद्वासने ष्टिं कुर्यात्। दर्शेष्ट्यनंतरं निमित्ते आगा
म्य..ावास्या पर्यंतमग्निहोत्रमंतः पातिनी पौर्णमासे ष्टिं कृत्वाऽमावास्यायामु

द्वासनेष्टिः कार्या। तस्याः प्रयोगः। अनुनिर्वाप्येण सह समानतंत्रतामाश्रित्य
लिख्यते। आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वास
यिष्यन्। अग्नीषोमीयमेकादशकपालं मनुनिर्वपेदग्नयेवसुमते ष्टाक
पालं मैत्रं चरुं। गार्हपत्यस्य पृष्ठ्याद्दर्भेष्वासाने। संकीर्त्यश्रीपरमेश्वर
प्रीत्यर्थं पुनराधेयं कर्तुमनुनिर्वाप्येः सह समानतंत्रं कुर्वन्नुग्न्युद्वासनेष्ट्या
यक्ष्ये। ऋत्विग्वरणं पौर्णमासं तत्रं। ममाग्ने अध्वर्युः जाय इमामूर्जमिध
मा० एष इहविः० बार्हिषावतं० त्रयोविंशतिधा। परिस्त० नोभावग्नी०
निष्कृतिवत्। निर्वाप० देवस्यत्वा। श्वा ग्नयेजुष्टं० अग्नयेवैश्वानरा

प्रजुष्टं॰ अग्नीषोमाभ्यांजु॰ अग्नयेपथिकृतेजु॰ मित्रायजु॰ अग्नयेहव्यवाहे॰
अग्नेवैश्वानर॰ अग्नीषोमोह॰ अग्नेपथिकृन्॰ मित्रहव्य॰ देवस्यत्वा॰
हस्ताभ्यामग्नयेग्नयेवैश्वानरायाग्नयेपथिकृतेमित्रायवोजु॰ प्रो
क्षाम्यग्नीषोमाभ्यां। अंशवस्थांते। यथाभागंव्यावर्तध्वं। चतुर्णा
मेकोराशिः। एकस्यैकः। इदमग्नयेग्नयेवैश्वानरायाग्नीषोमाभ्या
मग्नयेपथिकृतेच। पुरोडाशीयानुपलक्षयति। इदंमित्रायच। वैश्वा
नरकपालोपधानकालेआग्नेयस्याष्टोउपधायवैश्वानरस्य। धृष्टिरसि
दीतिपंचकृत्वश्छिदसीत्यनेनावृत्य। अग्नीषोमीयस्यप्रकृतिवत्।
अग्नयेपथिकृतेष्टावुपधाय अपाग्नइत्यादि॰ ध्रुवासि पृथिवी॰ स्थालीमु

प

पौहि पधायभगृणां० तप्यस्व। हर्योस्त्वेति पिष्टान्युत्सृज्य देवो व इति तंडुलानु
त्पुनाति। पिष्टेषु तप्ता आनीय। स्त्वाल्या मानयति। यथाभागं व्यावर्त
७२ ध्वं। २ यथा० तेथां। इदमग्नीषोमाभ्यां। इदमग्नये पृथुमते। पुरोडाशा
न धिश्रित्य घर्मोस्येति तंडुलानावपति। प्रथनाभि उरु नभस्माभि
न वासनानिं चरो। चतुर्णां मंत्रेणाभिघारणं। तत्स्मीमग्नीषोमीयस्य।
प्रियेण०। सीदंतु। यज्ञस्थ सर्वतः प्रजापतिरसि० अयं यज्ञः० वि
हव्यं। चतुर्होता। प्रकृतिवदाग्नेयः। अग्नये वैश्वानरायानुब्रूहि०
अग्निं वैश्वानरं यज० अग्नेर्वैश्वानरस्याहमन्नादः प्रकृति ७२
वदग्नीषोमीयः० अग्नये पृथुमते नुब्रू० अग्निं पृथुमतं यज। अग्नेः

सुमतो हं। अन्नादः मित्रायानुब्रू० मित्रं यज। मित्रस्याहं० अंदेः नो।
अस्माकं म्य ध्रुवा तो जुह्वां सम सग्रहं। त्वा प्रतिग्रहणं ध्रुवाप्यायनं।
सप्त समिधो प्याध्याया ग्रेणाहवनीयं परीत्य दक्षिणतस्तिष्ठन्विश्राहं जुहोति।
याते अग्न उत्सीदतः। पवमाना पशु प्रिया तनूस्तया सह पृथिवीमाविश रथं
तरेण साम्ना गायत्रेण छंदसा ततो नो मह आवह स्वाहा। अग्नय इदं० याते अ
ग्ने पावकाया मनसा श्रेयसी प्रिया तनूस्तया सहांतरिक्षमाविश वामदेव्येन
साम्ना त्रैष्टुभेन छंदसा ततो न ऊर्जमाकृधि गृहमेधिं च वर्तय स्वाहा। अग्नय इदं० यं
याते अग्ने सूर्ये शुचिः प्रिया तनूस्तया सह दिवमाविश बृहता साम्ना जागते
न छंदसा ततो नो वृष्ट्या वधि: स्वाहा। यास्ते अग्ने विभक्ती रिं इः सूकर आभर

भा॰ हि॰ तामु शोचिषु सीदेह भस्म वैश्वानरस्य पत्स्वाहा। यास्ते अग्ने कामदुघा
७३ विभक्ता रत्नु संभृताः। ताभिर्नः कामां धुक्ष्वेह प्रजां पुष्टिमथो धनं स्वाहा।
ये ते अग्ने वानस्पत्याः संभाराः संभृताः सह। तेभिर्गच्छ वनस्पतीन्।
स्वां योनिं यथायथं स्वाहा। अग्ने त्वमग्निर्यथा लोकमसदत्सदने स्वे। अ
ग्नीरहस्यं देवेषु पाथो मनसा सह स्वाहा। अमनय इति सर्वत्र त्यागः। स्विष्ट
कृदादि। अग्नीषोमीयवर्जं चतुर्धाकरणं। अन्वाहार्यो दक्षिणा। पार्वणं
पुनरालंभवर्जं संतिष्ठते। ततो ज्वलतोग्नीन् शुचौ देशे वसृजति चतुष्प
थइति बौधायनः। इष्टिः संतिष्ठते। एवमुद्वासने ष्टिं कृत्वा कर्तुर्नक्ष ७३
त्रपर्यंतमव स्वाग्नि। तिष्ठेत्। तारदुत्तरं निमित्ते आगामि दर्शेउ

त्सर्गे छिंकृत्वावर्षर्त्तु पर्यंतं विसृष्टाग्नि स्तिष्ठेत् ॰ वर्षर्त्तूत्तरं निमित्तेप
र्वंवत्सरपर्यंतंविसृष्टाग्निस्तिष्ठेत् ॥ ॰ दैवान्मानुषाद्वा प्रतिबंधात्तत्तद्दतो
दर्भाङ्: पुनराधेयाकरणे संवत्सरा[illegible]नैविसृष्टाग्निर्भवति ॥ तदुत्तरं स्थितश्चे
